# धर्मशास्त्रे प्रायश्चित्तानाम् स्वरूपम्

✧ श्रीमती कृष्णा शर्मा

कास्मिंश्चिदपि पापमूलकं कार्य संभवे सति तस्य निराकरणार्थ निश्चयपूर्वकं तपश्चर्यात्मक कार्यं यत् क्रियते तत् प्रायश्चित्तम् कथ्यते। तद्यथा –

**प्रायः नाम तपो प्रोक्तं चित्तं निश्चय उच्यते। तपो निश्चय संयुक्तं प्रायश्चित्तमितिं स्मृतम्।।1**

एवं प्रायश्चित्तेषु प्ररोचनार्थ कर्मविपाकमभिधायाधुना तेष्वेवाधिकारिणं प्रतिपादयति।

**विहितस्याननुष्ठानान्निन्दितस्य च सेवनात्। अनिग्रहाच्येन्द्रियाणां नरः पतनमृच्छति।।**

**तस्मात्तेनेह कर्तव्यं प्रायश्चित्तं विशुद्धये। एवमस्यान्तरात्मा च लोकश्चैव प्रसीदति।।2**

प्रायश्चित्तमूलानि कारणानि विचार्य एव यानि–यानि वेद विहित कर्माणि सन्ध्योपासन अग्निहोत्रादीनि सन्ति तेषां अकरणात् नैमित्तिक स्नानादि अभावात् अपि तथा निषिद्धस्य सुरापानादि करणात् तथा वेद प्रतिषिद्ध अभक्ष्याभक्ष्य अपेयापेय तथाविध अन्यदपि कामवाद कामभक्ष यथेच्छाचरणात् तथा इन्द्रियाणामनिगृह च ऐन्द्रिय विषयेषु शब्द रूप रस गन्ध स्पर्शादिषु अनियन्त्रित प्रावृत्तिवशात् नरः पतनं प्राप्नोति नरकं गच्छति इति अर्थः।

**अकुर्वन्विदितं कर्म निन्दितं च समाचरन्। प्रसक्वश्चेन्द्रियार्थेषु प्रायश्चित्तीयते नरः।।3**

श्लोकस्यार्थः यत् विहित् कर्माणि अकुर्वन् निन्दित् कर्माणि समाचरन् इन्द्रियार्थेषु च अत्यधिक उपभोगं कुर्वन् नरः प्रायश्चित्तं कर्तुं शक्यते। एतादृशो नरः प्रायाश्चित्ताधिकारी भवति। अस्मादेवकारणात् पापक्षयार्थ प्रायाश्चित्त्विधानात् जन्म जन्मांतरेषु आचरित् निषिद्ध कर्मजन्य पापानां समाप्ति हेत्वस्य विधानं कृतं। अतः प्रायश्चित्तशब्दोऽयं पापक्षयार्थे निमित्तिके कर्म विशेषेरूढः। (सुनिश्चित)एवं विधप्रायश्चित्त कृते अस्य जन्मस्यात्मा शुद्धित्वात् प्रसीदति। प्रसांद (अधिगच्छति) अर्थात् लोके सम्यक् तया योग्यों भवति।

**1. महापातकिनः :–**

**ब्रह्महा मद्यपः स्तेन स्तथैव गुरू तल्पगः। एते महापातकिनो यश्च तैः सह संवसेत्।।4**

ब्रह्महा (ब्राह्मण वधकर्ता ) मद्यपः (मद्यपानकर्ता) स्तेनः ( ब्राह्मणादीनां सुवर्णहर्ता) गुरूतल्पगः (गुरूपत्न्याभिगामी) तल्पशब्देन शयनवाचकत्वात् साहचर्य भावनायां भार्या धरित्यते एते महापातकिनः भवन्ति एवं सह निवसन् अपि नरः महापातकीः भवति। अन्यान्यपि पापानि एतेषां समानानि भवन्ति। तेषु प्रथमः ब्रह्महत्या समानानि –

**गुरूणामध्याधिक्षेपो वेदननिन्दा सहदधः, ब्रह्महत्या समं ज्ञेयमधीतस्य च नाशनम्।।5**

गुरूणामाधिक्येनाधिक्षेपः मिथ्यावादनः गुरूनिन्दा, वेदनिन्दा, मित्रस्य वधः अधीत वेद विद्यायाः विस्मरणं वेद विधा विनाशनं यथा स्वाध्यायाग्नि सुतस्त्यामः इत्यादि वचनात् इमामि सर्वाणि ब्रह्महत्या समानानि पातकानि भवन्ति।

**2. सुरापान समानानि :–**

**निषिद्ध भक्षणं जैहायमुत्कर्षे च वचोदनृतम्। रजस्वला मुखास्वादः सुरापानसमानानि तु।।6**

निषिद्ध लशुनादिकं पर्युषितान्नं तस्य बुद्धयाभक्षणं। यथा –

**छत्रांक विड्वराहं च लशुनं ग्रामकुक्कुटम्। प्लाण्डु गृजन चैव मत्याजग्ध्वा पतेन्नरः।।7**

गुरूविषये कुटिलाचरणः अनृतवचनं रजस्वलायाः मुखास्वादग्रहणं अर्थात् रजस्वलासंसर्गग्रहणं इमानि सर्वाणि सुरापानसमानानि सन्ति।

**3. स्वर्णस्तेय–**

**अश्वरत्न मनुष्यस्त्री भू धेनू हरणं तथा। निक्षेपस्य च सर्वं हि सुवर्णस्तेयसंमितम्।। 8**

अश्वादीनां ब्राह्मण सम्बन्धिनां कस्यापि– निक्षिप्त वस्तुनः अपहरणं एतत् सर्वं सुवर्णस्तेय समानं ज्ञातव्यम्।

**4. गुरूतल्प समानानि–**

**सखीभार्या कुमारीषु स्वयोनिष्वन्त्यजासु च। सगोत्रासु सुतस्त्रीसु गुरूतल्पसमं स्मृतम्।। 9**

मित्रपत्नि अविवाहिता (कन्या) भगिनोः चाण्डालिनीसमान गोत्रजास्त्री, पुत्रवधुः आसु सर्वासु संभोगसम्बन्धः गुरू तल्पसमं ज्ञेयम् पुत्रवधुः सापत्नमता भगिनी आचार्यपुत्री आचार्यपत्नी स्वसुता आसु सर्वासु गच्छन् नरः गुरूतल्पगामी भवति। इमानि सर्वाणि महापातकानि तत् समानानि च पातकानि भवन्ति।

**5. उपपातकानि–**

गोवधः, व्रात्यता, स्तेयं, ऋण अनपाकरणं, अग्निहोत्रस्य अधिकारी भूत्वाऽपि अविक्रेयस्यापि विक्रेयं, ज्येष्ठस्य अविवाहिते सति दाराः संयोगः, भृतकाध्यापकेन अध्ययनं, भूत्या अध्यापनं, परस्त्री संभोगः, सहोदरस्य (कनिष्ठस्य)

व्याख्याता (धर्मशास्त्रम्), राष्ट्रिय संस्कृत संस्थानम् (मानित विश्वविद्यालयः) जयपुर परिसरः जयपुरम्

विवाहिते सति अविवाहितः वाधुर्षिकावृत्ति ग्रहणं, स्त्री शूद्रवैश्यक्षत्रियादीनां वधः, निषिद्ध धनार्जितं, नास्तिकतावृतलोपः, (ब्रहमचारी आदि) अपत्य विक्रीणनधान्य कुप्येस्तेय, अभाज्ययजनं, मातापिता पुत्रत्यागः, वापीकूपतडागादीनां विक्रेयं, कन्यासंदूषणं, परिविन्दकस्य, याजनं, कौटिल्य, स्नातक वृतादीनां लोपः केवलादी (स्वयं भोक्ता) सुरापीस्त्रियः संभोगः, स्वाध्यायत्यागः, अग्नित्यागः, संस्काराणामकरणं, पितृव्य मातुलादीनांत्यागः, भोजनार्थं वृक्षच्छेदः, स्त्रीवधः, औषध्यादीनां जीवननिर्वाहं, मारकशास्त्रादिनां निर्माणं, दुर्व्यसनं, आत्मनः विक्रेयं, शूद्रादीनां सेवा, नीचसंग, हीनवर्णायाः स्त्रीया सह संभोग, अनाश्रमवासः, परान्नेनजीवनयापनं, निन्दित शास्त्र सिद्धान्तादीनामध्ययनं (अश्लील साहित्यं), परदृश्यापहरणं, पत्नी विक्रेयः इमानि सर्वाणि एकैकमपि उपपातकानि भवन्ति।

**गोवधो व्रात्यता स्तेयमृणाना चानवाक्रिया। अनाहिताग्रताऽपण्य विक्रयः परिवेदनम्।।**
**भृतादध्ययनादानं भृतकाध्यापनं तथा। पारदार्यं पारिवित्यं वार्धुष्यं लवणक्रिया।।**
**स्त्रीशूद्र विट्क्षत्रवधो निन्दितायोपजीवनम्। नास्तिक्यं व्रतलोपश्च सुतानां चैव विक्रयः।।**
**धान्यकुप्यपशुस्तेयमयाज्यानां च याजनम्। पितृमातृसुतत्यागस्तद्रागारामविक्रयः।।**
**कन्यासंदूषणं चैव परिविन्दकयाजनम्। कन्याप्रदानं तस्यैव कौटिल्यं व्रत लोपनम्।।**
**आत्मनोऽर्थे क्रियारम्भो मद्यपस्त्रीनिषेवणम्। स्वाध्यायाग्निसुतत्यागो वान्धवत्याग एवच।।**
**इन्धनार्थं द्रुमच्छेदः स्त्रीहिंसौषधजीवनम्। हिंस्रयन्त्रविधानं च व्यसनान्यात्यविकयः।।**
**शूद्रप्रेष्यं हीनसख्यं हीनयोनिनिषेवणम्। तथैवानाश्रमे वासः परान्नपरिपुष्टता।।**
**असच्छास्त्राधिगमनमाकरेष्वधिकारिता। भार्याया विकयश्चैषामेकैकमुपपातकम्।।10**

पूर्वोक्त बह्महत्यादीनां प्रायश्चित्त विषये उक्तम्।

त्याध्रादिना प्राण संकटे बाह्मणस्य प्राणरक्षा करणेन अथवा द्वादश गवां प्राण रक्षणेन तथा अश्वमेघयज्ञे अवमृथ (यज्ञस्य समापनं) स्नानकरणेन बह्महत्यादोषो व्यपोहति च।

**ब्राह्मणस्य परित्रणां द्ववां द्वादशकस्य च। तथाश्वमेघावभृथस्नानाद्वा शुद्धिमाप्नुयात्।।**

तथा अत्यन्त संकटग्रस्तं, रोगग्रस्तं, बहुकाल व्यापिनम् अत्यन्ततीव्रकष्टेन कुष्ठादिव्याधिना पीडितबाह्मणं ग्रामे, वा मार्गे दृष्ट्वा तम् रोगरहितं कृत्वा (औषध्यादिदानेन) ब्रह्म धातकः शुद्धो भवति। अस्याभिप्रायः अस्ति यत् आत्मप्राण परित्यागेन बाह्मणस्य रक्षणं कृत्वा सः शुचिर्भवति। अथवा कस्यापि विप्रस्य चौरेण हतं धनं सर्वस्वं वा गोभूहिरण्यादिकं सर्वस्वमानीय स्वामिने दद्यात्। एतर्थ क्षतो भूत्वाऽपि जीवन् शुद्धिंमाप्नोति। अथवा क्रमानुसारं विहित मन्त्रैः लोमेभ्यः स्वाहा इत्यादिवत मज्जान्तं जुहुयात्। यथा –

11 ''ब्रह्म महाऽग्निमुपसमाधाय जुहुयात् लोमानि मृत्योर्जुहोमि लोमभिमृत्यं वाशय।''

अथवा शुद्धिंअभिप्सन् संग्रामे मृत्युमवाप्य अथवा लगुडादिकस्य प्रहारेण पीडितोसन् मृत कल्पः जीवनशुद्धिम्वाप्नोति। अथवा निर्जनस्थाने मितभुक् सः वारत्रयं चातुर्वेदस्य जपं कृत्वा अथवा अल्पाहारेण सरस्वती नद्यास्तीरे पश्चिम दिशायां गच्छन् समुद्रं प्राप्नुयात्। (शुद्धिमंवाप्नोति) इत्थं मरणान्तिक्तं प्रायाश्चित्तम् चरयेत्।

**6. सुरापानं–**

**सुराम्बुघृतगोमूत्रपयसामग्नि संनिभम्। सुरापोऽन्यतमं पीत्वा मरणाच्छुद्धिमृच्छति।।**

सुरापः सुराजलघृतगोमूत्रदुग्धादिषु अन्यतमद्रव्यं पदार्थमग्निवर्णमिव तापयित्वा पिबेत्। तस्य पानेन मृत्युः सम्भाविते सति तस्य शुद्धिर्भवति। अर्थात् इदम् मरणान्तिकम् प्रायश्चित्तमभिहितं। तर्हि सुरापः आर्द्रवासो भूत्वा अग्नि वर्णासुरां पिबेत्। एतत् कथनं सकृत पान कामकृते च इदम् प्रायश्चित्तं व्यावृतानि अस्ति। सुरा शब्दो अत्र मद्यपाने रूढः अतैव सुरा शब्देनैव त्रिविधायाः सुरायाः तात्पर्य ग्राह्यं। यतो हि अनेकै स्थलेषु सुरा शब्दः अर्थेषु दरिदृष्यते। तत्र गौडी माध्वी च पौष्ठी च विज्ञेयात् त्रिविधा सुराः।

इति मनुवचनात् गुड़मधुपिष्टविकारेषु अन्तमायाः मुख्यत्वम् परिलभ्यते। अतः सुरापानप्रायश्चित्तप्रंसगे त्रिविधा सुरायाः इष्यते। तत्र अन्तमायाः पाने इदमेव प्रायश्चित्तमाचरणीयम्। यथा उक्तं –

**सुरावैमल मन्नानां पाप्मा च मलमुच्यते। तस्मात् बाह्मण राजानैव वैश्यश्च न सुरापेयं।।**

मद्यपान प्रसंगे दशविध मद्यस्योल्लेखः सम्प्राप्यते। तन्मध्यप्रतिषेधप्रसंगे ब्राहमणस्य प्रदर्शितः यथा –

**माधूकमैक्षव सैरं तालं खार्जूर पानसम। मधूत्यं चैव माध्वीकं भैरेयं नालिकेरजम्।। 12**

अमेध्यानि दशैतानि मद्यानि ब्राहमणस्य तु। इति कुत्रचित् (सुरां पीत्वा द्विजोमोहात् इत्यादि) वाक्येषु शब्देन वर्णस्य ग्रहणं। अत्र बालान् प्रसंगे चतुर्थाशं प्रायश्चितंमभिहितं। सामान्यतया बालस्य सुरापान कृते चतुर्थांश यथोक्तष्च (पाठोबालेषु दातव्यः सर्वपापैः स्वयं विधिः) कामकृते (बुद्धियुक्त) पादस्य द्विगुणी कृते षड्वार्षिक–प्रायश्चित्तं भवति न तु मरणान्तिकम्।

अतः ब्राहमणस्य कृते सर्वर्थ सुरापाननिषिद्धं राजानैव वैश्यो' कृते कदाचित् गोऽयादि मध्यप्रतिषेधः अस्ति। किन्तु शूद्रस्य सुरापान विषये प्रतिषेधो नास्ति। एवम् मुख्य तया सुरापाने प्रायश्चित्तं विधाय मद्यपाने प्रायशचित्तं

प्रोच्यते। यो खलु द्विजः अज्ञानात् तोदक भ्रन्त्या मद्यपानं करोति तथा अन्याः अपि ब्राहमणादयः रेत (वीर्य) विष्ठा, मूत्राणि अज्ञानात् पिबन्ति तदा त्रयोऽपि एते द्विजातयः तंत् कृच्छ्रव्रताचरणपूर्वकं पुनः यज्ञोपवीत संस्कार कर्तुम् योग्याः भवन्ति। अत्र पुनः संस्कार केवलं ब्रहमणस्यैव कृते प्रदर्शितः नत्वन्ययौः (क्षत्रियवैश्यौ) जानतः पाने अभ्यासे वा उक्तं–

13. ''मद्यभाण्डस्थितं तोयं पीत्वा पष्चरात्रं शंखपुष्पी श्रतं पयः पिबेत्'' इति। ज्ञानतः मुहुर्मुहुः पाने शंखनुसारं सप्तरात्रं गोमूत्रयावकं पिबेत्। द्विजातिभार्या प्रत्युक्तम् – पुण्यशीलाऽपि द्विजाति भार्या यदि गेहात् सुरापानं करोति तदा पति लोकं जहाति (त्यजति) इहलोके स्वगृध्र शूकर लक्षितान् तिर्यक योनि क्रमेण गच्छति।

**7. गोवध प्रायश्चित्तं–**

प्रायश्चित्तप्रकरणे महापातक प्रायश्चितं उक्त्वा ब्रह्म प्राप्तं गोवध प्रायश्चितं प्रदर्शयति। गोघ्नः (गोहन्ताः) पष्च गव्यस्य पानं कुर्यात्। ( गोमूत्रं, गोमयं, दुग्धं, दधिघृतम्) इति पष्चगव्यं। तथा मासमेकपर्यन्तं सम्यक् गोष्ठयांवशेत्। गवां सम्शेव्यन परिचरेत्। तथा मासान्ते गोदानेन शुद्धयते। अथवा सावधानमनसा कृच्छ्र व्रतम् अति कृच्छ्रव्रतम् वासमाचरेत्। त्रि अहोरात्रम् उषित्वा (उपवासम् कृत्वां) दश संख्यका गवां गो वृषभम् च दद्यात्। तदा गोहन्ता शुद्धयति। मां हन्तीति गोघ्नः मूल विभूजा दित्वात्कः प्रत्ययः। असौ मासं समाहितासीत्। किं कुर्वन् ? पष्च च तानि गव्यानि गोमूत्र, गोमय, श्रीरदधि घृतानि यथाविधि मिश्रितानि पिबनाहारान्तर परित्यागेन भोजनकार्ये तस्य विधानात्। तथा गोष्ठेशयः प्राप्त शयानानुवादेन गोष्ठविद्या नाद्विवा च स्वापप्रतिषेधाद्यतौ गोशालायां शयानः। गाः अनु–गच्छति तदस्य वृतमिति गोऽनुगामी वृतेणिनिः। अतश्च यासांगोष्ठे शेते सन्निधानाता एवं गाः प्रातर्वनः प्रति चरन्तीरनुगच्छेत्। अनुगच्छेदिति वचनाछदाता गच्छन्ति तदैव स्वयमनुगच्छेत्। यदातु तिष्ठत्यासते वा पष्चाद्गमनस्या शक्य करणत्वात्स्वयमपि तिष्ठेदासीतवेति गम्यते। अनुगमन विधानादेव ताभिः सायं गोष्ठं ब्रजन्तीभिः सहगोष्ठ प्रवेशोऽप्यर्थसिद्वः। एव कुर्वन् मासान्ते गो प्रदानेनैकाम् दत्वा तावता शास्त्रार्थस्य संपते गोहत्यायाः शुद्यतीत्येकं वृतम्। मासम् गोष्ठेशयो गोऽनुगामीति चानुवर्तते पष्च गव्याहारस्य तु निवृत्तिः कृच्छ्रविधानादेव। अतश्च मासम् निरन्तरम् कृच्छ्र समाहितष्चरेदित्यपरम्।

**8. स्त्रीवध प्रायश्चित्तम्–**

**दुर्वृन्त ब्रहम विट्क्षत्रशूद्रयोषा प्रमाप्य तु। हति धनुर्बस्तमपिं क्रमाद्यद्विशुद्वये।।14**

क्रमेण चतुर्वर्णाम् दुश्चरित्रां (स्वेच्छाचारिणी) स्त्रीं हत्वा क्रमानुसारं हन्ता प्रायाश्चितार्थम् जलाधारभूतम् चर्मकोशम् (चर्मजाल पात्रम्) धनु छांग अविम (मेष) च दद्यात्। किन्त्वदुष्टां (दोषरहित) स्त्रीयं हत्वा शूद्राहत्यावृतमाचरेते्। अथवा सद्य प्रसूतगवादशकम् सवत्सकम् दत्वा शुद्विमवाप्नुयात्।

ऋतुमतीं ब्राहमणी दत्वा कृच्छ्राब्दं षण्मासान्वेति। क्षत्रियां हत्वा षण्मासान्मासत्रयं वेति वैश्याम् हत्वा मासत्रय सार्धमासम् सार्धद्वाविंशत्यहानिवा इति। षड्र्षाणि राजन्ये प्राकृतं ब्रहमचर्य चीणि वैश्येसार्धं शूद्रे इति प्रतिपादयति – ष्क्षत्रियध्मणीषु वैश्यव त्क्षत्रियायां शूद्र वा वैश्यायां शूद्रांहत्वानवमासनिति। तदपि कर्म साधनत्वादि गुण योगिनीनाम् कामतो व्यापादने दृष्टव्यम् :–

**अकामत स्वदर्धं कल्प्यम् अत्रेय्यां सा तु प्रागुक्तम्। अस्थिमतां सहस्त्रं तु तथाऽनस्थिमतामनः।।**

प्रायश्चितं प्रसंगे विविध प्राणिनां वधे प्रायशचित्त व्यवस्थाम् प्रदर्शयते। प्रायश्चित्तप्रसंगे हिंसा प्रायशचित्तविवर्णनम् अनुपातक श्रंखलायां प्राणीवधे प्रायशचितं प्रदर्शयते। शूद्रहत्या व्रतरूपम् प्रायश्चित्तमर्थात् प्राकृतब्रह्मचर्यव्रतम्। आचरित्वा अथवा सद्यप्रसूतम् सवत्सकगोशकं दत्वा शुद्विं प्राप्नोति।

**संदर्भ ग्रन्थ :–**


1. मनृस्मृतिः
2. याज्ञवल्क्य स्मृतिः
3. मनुस्मृतिः
4. याज्ञवल्क्य स्मृतिः
5. याज्ञवल्क्य स्मृतिः
6. याज्ञवल्क्य स्मृतिः
7. मनुस्मृतिः
8. याज्ञवल्क्य स्मृतिः
9. याज्ञवल्क्य स्मृतिः
10. याज्ञवल्क्य स्मृतिः
11. वशिष्ठ धर्मसूत्र
12. वृहद विष्णु स्मृतिः
13. विष्णु स्मृति
14. याज्ञवल्क्य स्मृतिः